
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

छंद
१

॥श्रीगणेशायनमः॥मयरसतजभनलगसंमितंभ्रमतिवाङ्मयंजगतियस्य॥सज
यतिपिंगलनागःशिवप्रसादाद्विशुद्धमतिः॥त्रिगुरुंविद्धिमकारंलघ्वादिस
मन्वितंयकारख्यं॥लघुमध्यमंतुरेफंसकारमंतेगुरुनिबद्धं॥लघ्वंत्यंहि
तकारंजकारंजकारमुभयोर्लघुंविजानीयात्॥आदिगुरुंचभका
रंनकारमुभयोर्लघुंविजानीयात्॥मिहपिंगले त्रिलघुं॥दीर्घंसंयोग
परंतथास्वरव्यंजनांतमूष्मांतं॥सानुस्वारंचगुरुंक्वचिदवसानेपि
लघ्वंत्यं॥आदिमध्यावसानेषुयरताः यांतिलाघवं॥भजसागौरवंयां
तिमनौतुगुरुलाघवं॥त्रिविरामेद्दवर्णषण्मात्रमुवाचपिंगलःसूत्रं॥
छंदोवर्गपदार्थप्रत्ययहेतोश्चशास्त्रादो॥१॥धीश्रीस्त्री॥वरासायु॥का
गुहार॥वसुधासा॥सातेकल्॥कहासज॥किंनवदभ्॥नहसन॥गृ १

Acc. No. ~~4943~~. M-1893
Title - (i) छन्दःसूत्र, (ii) अष्टाध्यायीसूत्र पाठ, (iii) वैदिकनिघण्टु.
Author - (i) पिङ्गल (ii) पाणिनी (iii) यास्क (?).
Date - ?
Sub - वेदाङ्ग.
folio - 39. Xerox - 74.

ल॥ गंते॥ धा दि परः॥ हे॥ लो मः॥ ल्लै॥ अष्टौ वसव इति॥ २॥ छंदः॥
गायत्री॥ दैव्येकं॥ आसुरी पंचदश॥ प्राजापत्याष्टौ॥ यजुषां षट्॥ सा
म्नां द्विः॥ ऋचां त्रिः॥ द्वौ द्वौ साम्नां वर्द्धेत॥ त्रींस्त्रीन् ऋचां॥ चतुरश्चतुरः
प्राजापत्यायाः॥ एकैकं शेषे॥ जह्यादासुरी॥ तान्युष्णिगनुष्टुप् बृहती
पंक्ति त्रिष्टुप् जगत्यः॥ तिस्रस्तिस्रः समानाम्य एकैकास्याः॥ प्राग्यजुषा
मार्ष्यं इति॥ ३॥ पादः॥ इयादिपूरणः॥ गायत्र्या वसवः॥ जगत्या
आदित्याः॥ विराजो दिशः॥ त्रिष्टुभो रुद्राः॥ एकद्वित्रिचतुष्पादुक्त
पादं॥ आद्यं चतुष्पादृतुभिः॥ क्वचित्त्रिपादृषिभिः॥ सा पादनिचृ
त्॥ षट्कसप्तकयोर्मध्ये ष्टावतिपादनिचृत्॥ द्वौ नवकौ षट्कश्च
नागी॥ विपरीता वाराही॥ षट्कसप्तकाष्टकैर्वर्द्धमाना॥ विप

छं॰ ३
२

परीतान्प्रतिष्ठा॥ तृतीयं द्विपाज्जागतगायत्राभ्यां॥ त्रिपात्त्रैष्टुभैः॥ उष्णिग्गायत्रौ जाग
तश्च॥ ककुम्मध्ये चेदन्त्यः॥ पुरउष्णिक्पुरः॥ ४॥ परोष्णिक्परः॥ चतुष्पादृभि
भिः॥ अनुष्टुप्गायत्रैः॥ त्रिपात्क्वचिज्जागताभ्यां च॥ मध्येंते च॥ बृहती जागतस्
त्रयश्च गायत्राः॥ पथ्या पूर्वश्चेत्तृतीयः॥ न्यंकुसारिणी द्वितीयः॥ स्कंधोग्रीवी क्रोष्टु
केः॥ उरोबृहती यास्कस्य॥ उपरिष्टाद्बृहत्यंते॥ पुरस्ताद्बृहती पुरः॥ क्वचिन्नव
काश्चत्वारः॥ वैराजौ गायत्रौ च॥ त्रिभिर्जागतैर्महाबृहती॥ सतोबृहती तांडिनः॥
पंक्तिर्जागतौ गायत्रौ च॥ पूर्वौ चेदयुजौ सतःपंक्तिः॥ विपरीतौ च॥ आस्तारपंक्तिः
परतः॥ ५॥ प्रस्तारपंक्तिः पुरतः॥ विष्टारपंक्तिरंततः॥ संस्तारपंक्तिर्बहिः॥ अ
रपंक्तिः पंचकाश्चत्वारः॥ द्वावप्यल्पशः॥ पदपंक्तिः पंच॥ चतुष्कषट्कौ त्र्यश्च॥
पथ्यापंचभिर्गायत्रैः॥ जगती षड्भिः॥ एकेन त्रिष्टुब्ज्योतिष्मती॥ तथा जग

२

ती॥ पुरस्ताज्ज्योतिः प्रथमेन॥ मध्येज्योतिर्मध्यमेन॥ उपरिष्टाज्ज्योतिरंत्येन॥ एकस्मिं
न्पंचके छंदः शंकुमती॥ षट्के ककुम्मती॥ त्रिपादनिष्टमध्या पिपीलिकमध्या॥
ऊनाधिकेनैकेन निचृद्भुरिजौ॥ द्वाभ्यां विराट्स्वराजौ॥ आदितः संदिग्धे॥ ५
देवतादितश्च॥ अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वेदेवा दे
वताः॥ स्वराः षड्जऋषभगांधारमध्यमपंचमधैवतनिषादाः॥ सितसारंग
पिशंगकृष्णनीललोहितगौरा वर्णाः॥ आग्निवेश्यकाश्यपगौतमांगिरस
भार्गवकौशिकवासिष्ठानि गोत्राणि॥ श्यामान्यत्रिछंदांसि॥ रोचनाभाः
स्मृतयः॥ अनुक्तानां कामतो वर्णा इति॥ ७॥ चतुःशतमुत्कृतिः॥ चतुरश्च
तुरस्त्यजेदुत्कृतेः॥ तान्यभिसंव्याप्तेभ्यः कृतिः॥ प्रह्वत्या चोपसर्गवर्जि
तः॥ धृत्यष्टिशक्करीजगत्यः॥ पृथक्पृथक्पूर्वतः एतान्येवैषां॥ द्विती

4

छंदः
२

यं द्वितीयमन्तितः॥ अथ लौकिकं॥ आचैर्षु भाच्चयहार्षे॥ पादांश्चनुर्वगिः॥ य
थावृत्तसामामिर्वा॥ लः समुद्रागणः॥ गौगंतमध्यादिर्न्लश्च॥ स्वराअर्द्धे
चार्याई॥ अत्रायुङ्ज्॥ षष्ठोज्॥ न्लौवा॥ न्लौचेत्स्यद्वंद्वितीयादि॥ सप्तमः
प्रथमादि॥ अंत्येपंचमः॥ ८॥ षष्ठश्चल्॥ त्रिषुगणेषुपादः पथ्याद्येच॥
चपल्याद्वितीयतृतीयोम्मध्येजौ॥ पूर्वेमुखपूर्वा॥ जघनपूर्वेतरत्र॥ उभ
योर्महाचपल्या॥ आद्युईसमागीतिः॥ अंत्येनोपगीतिः॥ उत्क्रमेणोग्दीतिः॥
अर्द्धेवसुगणआर्यागीतिः॥ वैतालीयं द्विःस्वराअयुक्पादेयुक्वसवो
तेर्ल्गः॥ गौपछंदसिकं॥ आपातलिकाभौगु॥ शेषपरेणयुङ्नसाकं॥
षट्वामिश्राअजि॥ पंचमेनपूर्वःसाकंप्राच्यवृत्तिः॥ अयुक्तृतीयेनोदी

२

च्य रतिः ॥ आम्यां युगपन्नरहन्तकं ॥ अयुक्चारुहासिनी ॥९॥ युगप
रान्तिका ॥ गंता द्विर्वसवो मात्रासमकं नवमः ॥ द्वादशश्च वानवासिका ॥ विश्लो
कः पंचमाष्टमौ ॥ चित्रा नवमश्च ॥ परयुक्तेनोपचित्रा ॥ एभिः पादाकुलकं ॥
गीत्यार्यालः ॥ शिखाविपर्यस्तार्द्धा ॥ लः पूर्वश्चेज्ज्योतिः ॥ गश्चेत्सौम्या ॥
चूलिकैकान्नत्रिंशदेकत्रिंशदन्ते ग् ॥ साग्येनन सामालांग्ल इति ॥१०॥ इतं ॥ स
ममर्द्धसमं विषमं च ॥ समं तावत्कृत्वः कृतमर्द्धसमं विषमं च ॥ राश्यूनं ॥ द्वि
समानी ॥ लि गि निप्रमाणी ॥ वितानमन्यत् ॥ पादस्यानुष्टुब्वक्त्रं ॥ नप्रथमा
त्स्नौ ॥ द्वितीयतृतीययो रश्च ॥ वान्यत् ॥ यच्चतुर्थात् ॥ पथ्यायुजो ज् ॥ वि
पत्नीतेकीर्यं ॥ चपलायुजो न् ॥ विपुलायुग्लः सप्तमः ॥ सर्वतः सैतवस्य ॥
श्रोन्योन्यं च ॥ भनिपादं चतुरध्यापरचतुरूर्ध्वे ॥ गावंतेऽआपीडः ॥११॥

निवृं २
५

गावाहो चेत्सस्या पीडः ॥ अस्यापीडे गावाहौ च ॥ प्रथमस्य विपर्यासे मंजरी
लवल्यमृतधाराः ॥ उद्गतामेकतः स्जौ स्लौ न्सौ जौ भ्नौ ज्लौ ग्जौ स्जौ ज्ग् ॥
तृतीयस्य सौरभकं नौ नौ भ ललितं नौ सौ ॥ उपस्थितं प्रथकाद्यं म्जौ ज्सौ
गौ स्नौ ज्जौ ग्नौ स्नौ ज्जौ य् ॥ वर्द्धमानं त्रितीयं नौ स्नौ न्सौ ॥ शुद्धविराट् ऋषभं त
ज्राः ॥ अर्द्धं ॥ उपचित्रकं सौ स्लौ भौ भ्गौ ग् ॥ वेगवती सौ सौ भौ भौ ग् ॥ भद्रवि
राट् तौ जौ गौ भ्नौ जौ ग् ॥ केतुमती स्जौ सौ भौ न् ॥ आख्यानकी तौ जौ जौ
विपरीताख्यानकी ज्तौ जौ ग्तौ जौ ग् ॥ हरिणप्लुता सौ स्लौ न्भौ भ्रौ ॥ अ
परवक्त्रं नौ र्लौ ग्नौ जौ ॥ पुष्पिताग्रा नौ यौ न्जौ ज्रौ ग् ॥ १२ ॥ यवमती जौ
जौ जौ जौ ग् ॥ शिखैकान्नहेकत्रिंशद्हंते ग् ॥ खंजा महत्यथ युज्जीति ॥ १३ ॥ अनिर्दिष्टेस्व ॥
तनुमध्या त्यौ ॥ कुमारललिता ज्सौ ग् ॥ माणवका ॥ क्रीडितकं भ्तौ ल्गौ ॥ चित्रप

राम
६

हा भौ गौ ॥ विद्युन्माला मौ गौ ॥ भुजगशिशुभृता नौ मः ॥ हलमुखी रौ नौ सः ॥ शुद्धविरा
ण्मसौ जौ ॥ पणवो म्नौ यौ ॥ रुक्मवती भ्मौ स्गौ ॥ मयूरसारिणी र्जौ गौ ॥ मत्ता
म्भौ स्गौ ॥ उपस्थिता त्जौ जौ ॥ एकरूपं सौ जौ गः ॥ इन्द्रवज्रा तौ जौ गः ॥ उपेन्द्रव
ज्रा ज्तौ जौ गः ॥ आद्यन्तावुपजातयः ॥ दोधकं भ्भौ भौ गः ॥ शालिनी म्तौ तौ गौ
समुद्रर्षिभिः ॥ १४ ॥ वातोर्मी म्भौ तौ ग्गः ॥ भ्रमरविलसिता भौम् ॥ न्लौ गः ॥
रथोद्धता र्नौ स्लौ गः ॥ स्वागता र्नौ भ्गौ गः ॥ वृन्ता नौ स्गौ गः ॥ श्येनी र्जौ ल्गौ गः ॥ ज
गती ॥ वंशस्था ज्तौ ज्रौ ॥ इन्द्रवंशा तौ ज्रौ ॥ द्रुतविलम्बितं नभौ भ्रौ ॥ तोटकं
सः ॥ पुटो नौ म्यौ वसुसमुद्राः ॥ जलोद्धतगति ज्सौ ज्सौ रसर्त्तवः ॥ भुजंग
प्रयातं यः ॥ स्रग्विणी रः ॥ प्रमिताक्षरा स्जौ ॥ वैश्वदेवी मौ यौ विंद्रिय

छं॰ र॰
५

ऋषयुगानवमालिनीञ्जोभ्याविति॥१९॥प्रहर्षिम्नौज्रौगुस्त्रिकदशाकौ॥रुचिरा
ज्भौस्जौग्मुनुद्रकनवकौ॥मत्तमयूरम्तौय्सौग॥असंबाधाम्तौन्सौगावि
इयनवकौ॥अपराजितानौम्रौल्गौस्वरऋषयः॥प्रहरणकलितानौ
भ्नौल्गौ च॥वसंततिलकात्भौजौगौ॥सिंहोन्नताकाश्यपस्य॥उद्धर्षि
णैतवस्य॥चंद्रावर्तानौनौसौ॥मालर्तुनवकौचेत्॥मणिगुणनिकरो
वसुऋषयः॥मालिनीनौम्यौयु च॥ऋषभगजविलसितंभ्रौनौनौग्स्व
रनवकौ॥हरिणीन्सौम्रौस्लौग्रससमुद्रऋषयः॥पृथ्वीज्सौज्सौयु
लौग्वसुनवकौ॥वंशपत्रपतितंभ्रौन्भौन्लौग्गिगृषयः॥मंदाक्रा
म्भौन्तौतौग्समुद्रर्तुस्वराः॥शिखरिणीय्मौन्सौभ्लौगृतुरुद्राः॥कुसु
मितलतावेल्लितान्मौन्यौयाविंद्रियर्तुस्वराः॥२६॥शार्दूलवि

५

कोज्तिमौ स्भौ तौ गौ हि त्यक्रषयः॥ सुवदना म्रौ भ्नौ यभौ ल्गौ स्वरर्षिभि
स्साः॥ शिलनिवृत्तं॥ स्रग्धरा म्रौ भ्नौ यौ यू त्रिः सप्तकाः॥ मद्रकं भ्रौ न्रौ नौ न्
गौ दिगादित्याः॥ अश्व॥ ललितं न्जौ भ्जौ भ्जौ भ्लौ गु द्वादित्याः॥ मत्ता
क्रीडा म्भौ न्नौ न्लौ ग्वसुपंचदशकौ॥ तन्वी भ्तौ न्सौ भ्भौ न्यौ दिग्रवि
त्याः॥ क्रौंचपदा भ्मौ स्भौ नौ नौ ग्भूतेन्द्रियवस्वृषयः॥ भुजंगविजृंभि
तं म्मौ त्नौ नौ र्सौ ल्गौ वसुरुद्रर्षयः॥ अपवाहका म्नौ नौ नौ न्सौ गौ नव
कर्तुरसैर्ह्रियाणि॥ दंडको नौ रः॥ प्रथमं दंडवृष्टिप्रयातः॥ अन्यत्र तन्मा
त्रव्याभ्यां॥ शेषः प्रचित इति॥१७॥ अत्रानुक्तं गाथा॥ द्विकौ ग्लौ॥ मि
श्रौ चा॥ पृथग्लामिश्राः॥ वसा॥ वस्विकाः॥ लड्डी॥ सेके गः॥ प्रान्तिलोमगु
णं द्विर्लो धं॥ न तोऽन्यकं जह्यात्॥ द्विरर्द्धे॥ रूपे शून्यं॥ द्विः शून्ये॥ नाव

छंद

५

द्र्धेतगुणितं॥ हिद्व्यूनं॥ तदंतानां॥ एकोनेत्था॥ परे पूर्णपरे पूर्णमिति
१९ मयद्यादधीः पंचदश छंदः षोडशपादः परोष्णिक् प्रस्तारपंक्तिर्विं
शतिरेकविंशतिरेकविंशतिरेवद्वताद्वितोष्टौ चतुःशतं षष्ठाविंशति
र्विंशतिर्ध्रुग परांतिकान्नयोदश वृत्तं गाथा रो विंशतिर्विंशतिर्यवम
तीत्रीणि यतिर्विंशतिर्वीता मरमषाद्दशाष्ट पीणी विंशतिः शार्दूलवि
ज्ञितं पंचदशात्रानुष्टुभं सप्तदशाष्टादश॥ इति वेदांग छंदं समाप्तं॥ छ

५

कीलकं सप्तांगुलप्रमाणं सस्त्रेणाभिमंत्र्य
फट्‌ठंठः॥ अ० मनुष्यास्थिमयं
यस्य गेहे निखनेत॥ तस्य कुटुंबोत्सादनं भवति॥ उच्चाटनेन मोक्षः॥ ॐ ह्रें ह्रैं अमु
कं फट् स्वाहा॥ चतुष्कमांससमयुतं ञ्जु कुर्यात्॥ सहस्रेण शत्रुर्निर्यातः॥ ॐ श्री
श्रीं ह्रीं ऐं ऐं हा त्रैलोक्यविराजां विविधां मनसा स्मरेत्॥ सर्वकाम होमं
त्रः॥ ॐ कं ह्रीं॥ अयुतं जप्त्वा प्राणाकर्षणमालां कि तेन विश्वरूपी पिशाचि
व ह इं ह्रीं स्वाहा॥ पक्षैकं दशसहस्रं जप्त्वापि ङ हानेन सिध्यति॥ भूतभ
विष्यवार्तां कथयति॥ ॐ सां सां सं संसः नं नः हं हः संसः ठं गौं खं खः वं वः
वं सः स्फूः २ ह्रीं हूं हूं हः क्षीं क्षं क्षौं सः भ्रु फुः फट् फ्रीं स्वाहा॥ इति मं
त्रेणाभिमंत्र्य [illegible] तेन मात्रेण चराचरास्य समस्त विष नाशनं भवति॥
ॐ ह्रं ह्रीं ह्रूं हः ॐ क्षं तं तं रंरं तं सा कुं सुं हं सः॥ ह्रें ऐं ब्रह्मवचसा विष्णु विच
नेन विषं हर हर च ह सर्वरक्षां हिं सिं सं त्रसप त्रायै से सर्व जं ज सर्व दुष्टान्
मोचय मम हा हे व हूं हूं फट् स्वाहा॥ सर्व विष सर्व भूत सर्व ग्रह नाशनं॥
स्मरणमात्रेण॥ ॐ हं ॐ सः शांतिदायक मंत्रस्मरणमात्रेण त्रिकाष्ठमयी

4943

श्रीगणेशाय नमः॥ हरिः ॐ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ येधौता गिरः पुंसां विमलैः श
ब्दवारिभिः॥ तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥ अइउण्। ऋऌक्।
एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जब
गडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति प्रत्याहारसू
त्राणि। १। वृद्धिरादैच्। अदेङ्गुणः। इको गुणवृद्धी। न धातुलोप आर्द्ध
धातुके। क्ङिति च। दीधीवेवीटां। हलोनन्तराः संयोगः। मुखनासिकाव
चनोनुनासिकः। तुल्यास्यप्रयत्नं सवर्णं। नाज्झलौ। ईदूदेद्द्विवचनं प्रगृ
ह्यं। अदसो मात्। शे। निपात एकाजनाङ्। ओत्। संबुद्धौ शाकल्यस्येता
वनार्षे। उञः। ऊँ। ईदूतौ च सप्तम्यर्थे। दाधाघ्वदाप्। १। आद्यन्तवदेकस्मि १
न्। तरप्तमपौ घः। बहुगणवतुडति संख्या। ष्णान्ता षट्। डति च। क्त्व

तूनिष्ठा।सर्वादीनिसर्वनामानि।विभाषादिक्समासेबहुव्रीहौ।नबहु
व्रीहौ।तृतीयासमासे।द्वंद्वेच।विभाषाजसि।प्रथमचरमतयाल्पार्द्ध
कतिपयनेमाश्च।पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायाम
संज्ञायां।स्वमज्ञातिधनाख्यायां।अंतरंबहिर्योगोपसंव्यानयोः।स्वरा
दिनिपातमव्ययं।तद्धितश्चासर्वविभक्तिः।कृन्मेजंतः।क्त्वातोसुन्कसु
नः।२।अव्ययीभावश्च।शिसर्वनामस्थानं।सुडनपुंसकस्य।नवेतिवि
भाषा।इग्यणःसंप्रसारणं।आद्यंतौटकितौ।मिदचोंत्यात्परः।एचइग्
घ्रस्वादेशे।षष्ठीस्थानेयोगा।स्थानेंतरतमः।उरण्रपरः।अलोंत्यस्य।ङि
च्च।आदेःपरस्य।अनेकाल्शित्सर्वस्य।स्थानिवदादेशोनल्विधौ।
अचःपरस्मिन्पूर्वविधौ।नपदांतद्विर्वचनवरेयलोपस्वरसवर्णानु
स्वारदीर्घजश्चर्विधिषु।द्विर्वचनेचि।अदर्शनंलोपः।३।प्रत्ययस्य

अ०१

लुकूश्लुलुपः।प्रत्ययलोपेप्रत्ययलक्षणं।नलुमतांगस्य।अचोंत्यादिटि।
अचोंत्यादिटि।पूर्वउपधा।तस्मिन्निति निर्दिष्टे पूर्वस्य।तस्मादित्युत्तरस्य।
स्वंरूपंशब्दस्याशब्दसंज्ञा।अणुदित्सवर्णस्य चाप्रत्ययः।तपरस्तत्कालस्य।
आदिरंत्येनसहेता।येनविधिस्तदंतस्य।वृद्धिर्यस्याचामादिस्तद्वृद्धं।त्य
दादीनिच।एंङ्प्राचांदेशे।७।दहिराद्यंतवदव्ययीभावः।प्रत्ययस्यलुपंच
हशा।प्रथमस्यप्रथमपादः॥गाङ्कुटादिभ्योञ्णिन्ङित्।विजइट्।वि
भाषोर्णोः।सार्वधातुकमपित्।असंयोगाल्लिट्कित्।इंधिभवतिभ्यांच।
मृडमृदगुधकुषक्लिशवदवसःक्त्वा।रुदविदमुषग्रहिस्वपिप्रछः।संश्च।
इकोझल्।हलंताच्च।लिंङ्सिचावात्मनेपदेषु।उश्च।वागमः।हनःसि
च्।यमोगंधने।विभाषोपयमने।स्थाघ्वोरिच्च।नक्त्वासेट्।निष्ठाशीङ्
स्विदिमिदिक्ष्विदिधृषः।मृषस्तितिक्षायां।१।उदुपधाद्भावादि

२

आदिरंत्येनसहेता।येनविधिस्तदंतस्य।वृद्धिर्यस्याचामादिस्तद्वृद्धं।
त्यदादीनिच।एङ्‌प्राचांदेशे।वृद्धिरादैंतवद्व्ययीभावःस्वरयस्य
लुक्‌पंचदश॥प्रथमाध्यायस्यप्रथमःपादः॥गाङ्‌कुटादिभ्योञ्णि
न्ङित्।विजयिट्।विभाषोर्णोः।सार्वधातुकमपित्।असंयोगाल्लि
कित्।इंधिभवतिभ्यांच।मृडमृदगुधकुषक्लिशवदवसःक्त्वा।रुद
विदमुषग्रहिस्वपिप्रछःसंश्च।इकोझल्।हलंताच्च।लिङ्‌सिचावा
त्मनेपदेषु।उश्च।वागमः।हनःसिच्।यमोगंधने।विभाषोपयमने।
स्थाघ्वोरिच्च।नक्त्वासेट्।निष्ठाशीङ्‌स्विदिमिदिक्ष्विदिधृषः।

अ०
२

मृषस्तितिक्षायां॥२॥उदुपधाद्भावादिकर्मणोरन्यतरस्यां॥पूङः क्त्वा च।
नोपधात्थफान्ताद्वा।वंचिलुंच्यृतश्च।तृषिमृषिकृशेः काश्यपस्य।रलो व्यु
पधाद्धलादेः संश्च।ऊकालोऽज्झ्रस्वदीर्घप्लुतः।अचश्च।उच्चैरुदात्तः।नीचै
रनुदात्तः।समाहारः स्वरितः।तस्यादित उदात्तमर्द्धह्रस्वं।एकश्रुति दूरात्सं
बुद्धौ।यज्ञकर्मण्यजपन्यूङ्खसामसु।उच्चैस्तरां वा वषट्कारः।विभाषा छं
दसि।न सुब्रह्मण्यायां स्वरितस्य तूदात्तः।देवब्रह्मणोरनुदात्तः।स्वरि
तात्संहितायामनुदात्तानां।उदात्तस्वरितपरस्य सन्नतरः।४ अपृक्त एक
ाल्प्रत्ययः।तत्पुरुषः समानाधिकरणः कर्मधारयः।प्रथमानिर्दि

२

ष्टंसमासउपसर्जनं।एकविभक्तिचापूर्वनिपाते।अर्थवदधातुरप्रत्ययः
प्रातिपदिकं।कृत्तद्धितसमासाश्च।ह्रस्वोनपुंसकेप्रातिपदिकस्य।
गोस्त्रियोरुपसर्जनस्य।लुक्तद्धितलुकि।इद्गोण्याः।लुपियुक्तवद्व्यक्ति
वचने।विशेषणानांचाजातेः।तदशिष्यंसंज्ञाप्रमाणत्वात्।लुब्योगाप्रख्या
नात्।योगप्रमाणेचतदभावेदर्शनंस्यात्।कालोपसर्जनेचतुल्यं।जा
त्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां।अस्मदोद्वयोश्च।फल्गु
नीप्रोष्ठपदानांचनक्षत्रे।।२।।छंदसिपुनर्वस्वोरेकवचनं।विशाखयो
श्च।तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुवचनस्यद्विवचनंनित्यं।सरूपा

अ०
४

णामेकशेष एकविभक्तौ।। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः।। स्त्रीपुंवच्च।। पुमा
न्स्त्रिया।। भ्रातृपुत्रौ स्वसृदुहितृभ्यां।। नपुंसकमनपुंसकेनैकवच्चास्यान्यतर
स्यां।। पिता मात्रा।। श्वशुरः श्वश्र्वा।। त्यदादीनि सर्वैर्नित्यं।। ग्राम्यपशुसंघेष्वतरु
णेषु स्त्री।। गाङ्कुटाद्युदृपधा हृष्ट कन्छं हसिपुनर्वस्वोस्त्रयोदश।। इति द्वि
तीयः पादः।। भूवादयो धातवः। उपदेशेऽजनुनासिक इत्। हलन्त्यं। न वि
भक्तौ तुस्माः। आदिर्ञिटुडवः। षः प्रत्ययस्य। चुटू। लशक्वतद्धिते। त
स्य लोपः। यथासंख्यमनुदेशः समानां। स्वरितेनाधिकारः। अनुदात्तं
ङित आत्मनेपदं। भावकर्मणोः। कर्तरि कर्मव्यतिहारे। न गतिहिंसा
र्थेभ्यः। इतरेतरान्योन्योपपदाच्च। नेर्विशः। परिव्यवेभ्यः क्रियः। विप

४

राभ्यांजेः।आङोदोनास्यविहरणे॥१॥क्रीडोनुसंप्रविभ्यःश्च।समवप्रविभ्यः
स्थः।प्रकाशनस्थेयाख्ययोश्च।उदोनूर्ध्वकर्मणि।उपान्मंत्रकरणे।अक
र्मकाच्च।उद्विभ्यांतपः।आङोयमहनः।समोगम्यृछिप्रछिस्वरत्यर्तिश्रु
विदिभ्यः।निसमुपविभ्योह्वः।स्पर्धायामाङः।गंधनावक्षेपणसेव
सेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषुकृञः।अधेःप्रसहने।वेः
शब्दकर्मणः।अकर्मकाच्च।संमाननोत्संजनाचार्यकरणज्ञानभृतिविग
णनव्ययेषुनियः।कर्तृस्थेचाशरीरेकर्मणि।वृत्तिसर्गतायनेषुक्रमः।
उपपराभ्यां।आङउद्गमने॥२॥वेःपादविहरणे।प्रोपाभ्यांसमर्थाभ्यां।
अनुपसर्गाद्वा।अपन्हवेज्ञः।अकर्मकाच्च।संप्रतिभ्यामनाध्याने।आ

अ०
१

सनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः।व्यक्तवाचां समुच्चारणे।अनोर
कर्मकात्।विभाषा विप्रलापे।अवाद्ग्रः।समः प्रतिज्ञाने।उदश्चरः सकर्मका
त्।समस्तृतीयायुक्तात्।दाणश्च सा चेच्चतुर्थ्यर्थे।उपाद्यमः स्वकरणे।ज्ञाश्रुस्मृ
दृशां सनः।नानोर्ज्ञः।प्रत्याङ्भ्यां श्रुवः।शदेः शितः।।३।।म्रियतेर्लुङ्लिङोश्च।
पूर्ववत्सनः।आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य।प्रोपाभ्यां युजेरयज्ञपात्रेषु।
समः क्ष्णुवः।भुजोऽनवने।णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने।भीस्म्योर्हे
तुभये।गृधिवंच्योः प्रलंभने।लियः संमाननशालीनीकरणयोश्च।मि
थ्योपपदात्कृञोऽभ्यासे।स्वरितञितः कर्त्रभिप्राये क्रियाफले।अपा
द्वदः।णिचश्च।समुदाङ्भ्यो यमोऽग्रंथे।अनुपसर्गाज्ज्ञः।विभाषोपपदे

१

नसतीसमाने। शेषात्कर्तरिपरस्मैपदं। अनुपराभ्यांकृञः।
अभिप्रत्यतिभ्यः क्षिपः॥४॥प्राद्वहः। परेर्मृषः। व्याङ्परि
भ्योरमः। उपाच्च। विभाषाकर्मकात्। बुधयुधनशजेनेङ्
प्रुद्रुस्रुभ्योणेः॥ निगरणचलनार्थेभ्यश्च। अणावकर्मकाच्चि
त्तवत्कर्तृकात्। नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। द्यु
द्भ्योलुङि। वृद्भ्यः स्यसनोः। लुटिचक्लृपः। ५॥ भूवाहयः क्रीडोनुवेः
पाद्क्रियुतेः मा ह्रु हस्त्योयोदश॥ प्रथमस्यतृतीयः पादः। आकडा
रादेकासंज्ञा। विप्रतिषेधेपरंकार्यं। यूस्त्र्याख्योनदी। नेयङुवङ्

वृ.स्यानावा।स्त्री।वामि।ङि.ति ह्रस्वश्च।शेषो घ्यसखि।पतिः समास ए
व।षष्ठी।युक्तः छंदसि वा।ह्रस्वं लघु।संयोगे गुरु।दीर्घं च।यस्मात्प्र
यविधिस्तदादि प्रत्ययेंगं।सुप्तिङंतं पदं।सिति च।स्वादिष्वस
र्वनामस्थाने।यचि भं।तसौ मत्वर्थे।अयस्मयादीनि छंदसि।
१।बहुषु बहुवचनं।द्व्येकयोर्द्विवचनैकवचने।कारके।ध्रुव
मपायेपादानं।भीत्रार्थानां भयहेतुः।पराजेरसोढः।वारणार्था
नामीप्सितः।अंतर्द्धौ येनादर्शनमिच्छति।आख्यातोपयोगे।
जनिकर्तुः प्रकृतिः।भुवः प्रभवः।कर्मणा यमभिप्रैति स संप्र

ओं तर्य्यो हीकारस्य यकारः। सुध्य् इति स्थिते। अनचि च। अचः परस्य यरो
द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वं। स्थानिवदादेशोनल्विधौ। आदेशः
स्थानिवत्स्यात् न तु स्थान्यलाश्रयविधौ। अनेनेह यकारस्य स्थानिवत्त्वा
द्विनाच्त्वमाश्रित्यानचि चेति द्वित्वविधौ नाप्नोत्यनल्विधाविति। तन्निषेधात्।
अचः परस्मिन्पूर्वविधौ। अल्विध्यर्थमिदं। परनिमित्तोजादेशः स्थानिवत्स्यात्।
स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। इति यणः स्थानिवद्भावेप्रा
प्ते। न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु।
पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये। परनिमित्तोजादेशो न स्थानि
वत्स्यात्। इति स्थानिवद्भावनिषेधः। झलां जश् झशि। स्पष्टं। इति ध
कारस्य दकारः। अदर्शनं लोपः। प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्। सं

योगांतस्य लोपः। संयोगांतं यत्सदंतं तदंतस्य लोपः। इति यलोपे प्राप्ते। यणः प्र
तिषेधो वाच्यः। यणोमयोद्वेवाच्ये। मयइति पंचमी यण् इति षष्ठी पक्षे
यकारस्यापि द्वित्वं। तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि
रूपाणि। एकधमेकयं। द्विधं द्वियं। द्विधमेकयं। एकधं द्वियं। सुध्युपा
स्यः। मध्वरिः। धात्रंशः। लाकृतिः। नादिन्याक्रोशे पुत्रस्य। पुत्रेश द्व
स्य न द्वे स्तः आदिनी परे आक्रोशे गम्ये। पुत्रादिनी त्वमसि पापे। आक्रो
शे किं। तत्वकथने द्विर्वचनं भवत्येव। तत्परे च। पुत्रपुत्रादीनी त्वमसि
पापे। वा हतजग्धयोः। पुत्रहती। पुत्त्रहती। पुत्रजग्धी। पुत्त्रजग्धी। त्रि
प्रभृतिषु शाकटायनस्य। त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वं। इंद्रः। इंन्द्रः

राष्ट्रं । रामपृष्ठं । सर्वत्र शाकल्यस्य । द्वित्वं न । अब्रह्मा । दीर्घादाचार्याणां । द्वि
त्वं न । पात्रं । दात्रं । अचो रहाभ्यां द्वे । अचः पराभ्यां रेफहकाराभ्यां पर
स्य यरो द्वे वा स्तः । अनचि चेति प्राप्ते रेफस्य द्वित्वं दधि कौडिन्याये बाध्य
ते । हर्य्यनुभवः । नह्यस्ति । हलो यमां यमि लोपः । हलः परस्य यमो लो
पः स्याद्वा यमि । इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यं । लो
पारंभफलं तु आदित्यो देवतायस्य आदित्यं । हविः । यमां यमीति य
था संख्यविज्ञानान्नेह । माहात्म्यं । हलः किं । पय्यो । एचोयवायावः । ए
चः क्रमात् अय् अव् आय् आव् एते स्युरचि । तस्य लोपः । तस्येतो लोपः
स्यात् । इति यवयोर्लोपो न । उच्चारणसामर्थ्यात् । एवं चेत्संज्ञापीह न भ
वति । हरये । विष्णवे । नायकः । वांतो । यिप्रत्यये । यकारादौ प्रत्यये प

रे ओसे नोरवावोऽस्तः। गोर्विकारो गव्यं। गोः पयसोर्यत्। नावा तार्यं नाव्यं। नौवये
धर्मेत्यादिना यत्। गोर्यूतौ छंदस्युपसंख्यानं। अध्वपरिमाणे च। गव्यूतिः। यूति
र्यूतिमूतिरित्यादिना यूतिशब्दो हि निपातः। वांतदेस्य व्वकारात्। गोर्यूतौ विस
त्र छकाराद्वा पूर्वभागस्तोयो व्योर्वल्कीति पूर्वो नवकारः। प्रश्लिष्यते। तेन
श्रूयमाणवकारांत्यादेशः स्यात्। वकारो न लुप्यत इति यावत्। धातो
स्तन्निमित्तस्यैव। यादौ प्रत्यये परे धातोरेचश्चेद्वांतादेशस्तर्हि तन्निमि
त्तस्यैव नान्यस्य। लव्यं। अवश्यलाव्यं। तन्निमित्तस्यैव किं। ओयते।
ओयत। क्षय्यजय्यौ शक्यार्थे। यांतादेशनिपातनार्थमिदं। क्षेतुं शक्यं क्ष
य्यं। शक्यार्थे किं। क्षेतुं जेतुं योग्यं क्षेयं पापं जेयं मनः। क्रय्यस्तदर्थे। तस्मै

८

प्रकृत्याश्रयितुं तदर्थं। के ते। ताः क्रोणी सुरीति बुध्या आवश्यकेण प्रसारितं कथ्यं। के यमन्यत्।
कथणा ई हि मित्यर्थः। लोपः शाकल्यस्य। अवर्णपूर्वयोः पदान्तयोः यवयोर्लोपो वा।
अशि परे। पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धत्वान्न स्वरसंधिः। हरए हि। हर
यहि। विष्णइह। विष्णविह। श्रिया उद्यतः। श्रियायुद्यतः। गुरा उत्कः। गुरावुत्कः।
कानि सन्ति कोऽस्तु इत्यत्रास्तिरलोपस्य स्थानिवत्त्वेन यणो वाहेशो प्राप्तो न पदा
न्तविधौ निषेधाद्वरतः। एकः पूर्वपदयोरित्यधिकृत्य। आ
द्गुणः। अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्संहितायां।
उपेन्द्रः। रमेशः। गंगोदकं। उरण्रपरः। ऋ इति त्रिंशतः संज्ञेत्युक्तं। तस्स्था
नीयाण् सरपरः संन्नेव प्रवर्तते। नचांतरतम्यात्कण्ठ ऋ ग्लिरित्यत्र। तव
लृकार इत्यत्राल्। अचो रहाभ्यामिति पक्षे द्वित्वं। सत्र गां अरीसवर्णे। हल्

परस्य भरो लोपो वा स्यात् सवर्णे सति। द्वित्वाभावे लोपे सति एकधं। असति लोपे द्वित्व
लोपयोर्वा द्विधं। सति द्वित्वे लोपे चासति त्रिधं। लृष्यधिः। यणइति पंचमी मयइतिप
स्तीपक्षे ककारस्य द्वित्वं। लकारस्य त्वनचि चेति तेन न तथृकारइत्यत्र रूपचतुष्टयं। द्वित्वे
लस्यैव कस्यैव नो भयोरुभयोरपि। तथृकारासिद्धिर्बुधैर्बोध्यं रूपचतुष्टयं। वृद्धि
रेचि। आदेचि परे। वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वं। गंगौघः। देवैश्वर्यं
कृष्णौत्कंठ्यं। एत्येधत्यूठ्सु। अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः
स्यात्। पररूपगुणापवादः। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किं। उपेतः। मा भवान्प्रे
दिधत्। पुरस्तादपवादाः अनंतरान्विधीन्बाधंते नोत्तरानिति न्यायेनेयं वृद्धि
रेङि पररूपस्यैव बाधिका न तु ओमाङोश्चेति। तेनावैहीति वृद्धिरसाधुरेव।
अक्षादूहिन्यामुपसंख्यानं। अक्षौहिणी सेना। स्वादीरेरिणोः। स्वैरः। स्वैरि

रा॰
९

तुं शीलमस्येति स्वैरी । स्वैरिणी । प्रादूहोढोढ्येषैष्येषु । प्रौहः । प्रौढः । अर्थवदूहणे
नानर्थकस्य । प्रष्ठेति सूत्रे राजेः पृथक् आजिग्रहणात् । ति न तु ऊहग्रहणे कृते तमेव
गृह्णीते न तु ऊढवत्वं तस्यैकदेशः । प्रौढवान् । प्रौढिः । इष एष एष्या यां तु ह्रादिः । इष
गतौ हि वाहिः । इष आभीक्ष्ण्ये क्र्यादिः । एषां ग्रहणं त्रिष्वपि च एष एष्य इ
ति रूपे । न च पररूपमातेनेन वृद्धिः । प्रैषः । प्रैष्यः । यत्तु ईष उंछे । यच्च ईष गा
तिहिंसादर्शनेषु । तयोर्दीर्घपाठत्वाद्दीषः । ईष्यः । तत्रा गुणे प्रेषः । प्रेष्यः । ऋ
ते च तृतीयासमासे । सुखेनार्तः । सुखार्तः । तृतीयेति किं । परमर्तः । प्रवत्सरकं
बलवसनार्णदशानामृणे । प्रार्णं । वत्सतरार्णं । इत्यादि । ऋणस्यापनय
नाय यदन्यदृणं क्रियते तदृणार्णं । दशार्णो देशः नदी च दशार्णा । ऋण

शब्दे॥ दुर्गभूमौ जले च॥ उपसर्गादृति धातौ॥ अवर्णान्तादुपसर्गादृकारादौ धातौ प
रेकादेशः स्यात्॥ उपार्छति॥ प्रार्छति॥ अंतादिवच्च॥ योयमेकादेशः स पूर्वस्या
न्तवत्परस्यादिवत्स्यात् इति रेफस्य पदान्तत्वात् खरवसानयोर्विसर्जनीयः॥
खरि अवसाने च रेफस्य विसर्जनीयः पदान्ते स्यात्॥ इति विसर्गे प्राप्ते॥ अं
तवद्भावेन पदान्तस्य न विसर्गः॥ उभयथर्क्षु कर्तरि चर्षिदेवत्यानि निर्देशाद्दी
उपसर्गेणैव धातोराक्षेपे सिद्धे धाताविति योगविभागेन पुनर्विधानार्थं
तेन ऋ स्य कर इति पाक्षिकोपि ग्रहीतिभावोत्र न भवति॥ वा सुप्यापिशलेः॥
अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ वृद्धिर्वा स्यात्॥ आपिशलिग्रह
णं पूजार्थं॥ प्रार्षभीयति॥ प्रर्षभीयति॥ सावर्ण्यात् ऌकारस्य ग्रहणं॥ प्रा
ल्कारीयति॥ प्रल्कारीयति॥ तपरत्वाद्दीर्घेन॥ उप ॠ कारीयति॥ उपर्कारी

१०

यति। एङि पररूपं। आङुपसर्गादेङि धातौ पररूपमेकादेशः स्यात्। प्रेजते।
उपोषति। इह वा सुपीत्यनुवर्त्य वाक्यभेदेन व्याख्येयं। तेन एङादौ सुब्धातौ
वा। उपेङ्कीयति। उपैङ्कीयति। प्रोघीयति। प्रौघीयति। एवे चानियोगे।
नियोगो अवधारणं। क्वेव भोक्ष्यसे। अनवकॢप्तावेवशब्दः। अनियोगे
किं। तवैव। अचोन्त्यादि टि। अचां मध्ये योन्त्यः स आदिर्यस्य तट्टिसंज्ञं
स्यात्। शकंध्वादिषु पररूपं वाच्यं। तच्च टेः। शकंधुः। कर्कंधुः। कुल-
टा। सीमंतः केशवेशे। सीमान्तो न्यः। मनीषा। लांगलीषा। पतंजलिः।
सारंगः पशुपक्षिणोः। साराङ्गोन्यः। आकृतिगणोयं। मार्तंडः। ओ-
त्वोष्ठयोः समासे वा। स्थूलोतुः। स्थूलौतुः। बिंबोष्ठः। बिंबौष्ठः। समासे

सि॰कौ।

किं। नवोष्टः। ओमाङोश्च। ओमि आङि च आत्पररूपमेकादेशः स्यात्।
शिवायोंनमः। शिव आ इहि। शिवेहि। अव्यक्तानुकरणस्यात इतौ। ध्वनेरनुकरणस्य योध
ङ्कः स्तस्मादितौ परे पररूपमेकादेशः स्यात्। पटत् इति। पटिति। एकाचो न। अदिति। नाम्रे
डितस्यांत्यस्य तु वा। आम्रेडितस्य प्रागुक्तं न स्यात् त्यस्य तु तकारमात्रस्य वा स्यात्। डाडि बहु
लं द्वे भवत इति बहुल वचनाद्द्वित्वं। तस्य परमाम्रेडितं। द्विरुक्तस्य पररूपमाम्रे। न
स्यात्। पटत्। पटीति। झलां जशोंऽते। पदांते झलां जशः स्युः। पटत् पटदिति। अकः
सवर्णे दीर्घः। अकः सवर्णे चि दीर्घ एकादेशः स्यात्। दैत्यारि

श्रीगणेशाय नमः॥ ऐं ह्रीं श्रीं अं हं । हंसः शिवः सो हं स्वरूपनिरूपणाय हे नवे स्वगुरु
आनंदानंद नाथा श्रीपादुकां पूजयामि नमः॥ ३ ऐं॰ सो हं हंसः शिवः स्वच्छ
ः प्रकाशः परिपूर्णानंद नाथा परमगुरु श्री विद्यानंद नाथा श्रीपादुकां॰ ३
हंसः शिवः सोहं हंसः स्वात्मारामपंचर वीरीन तेजसे परमेष्ठी गुरु श्री॰
ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा॥
ॐ ह्रीं नमः शि
ॐ ह्रीं नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा॥
वाय॥

श्री॥ अथ सिद्धांतकौमुदी प्रारंभः॥

श्रीराम

१

॥श्रीगणेशाय नमः॥ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च॥ वैयाकरणसि
द्धांतकौमुदीयं विरच्यते॥ अइउण्॥ ऋऌक्॥ एओङ्॥ ऐऔच्॥ हयवरट्॥ लण्॥
ञमङणनम्॥ झभञ्॥ घढधष्॥ जबगडदश्॥ खफछठथचटतव्॥ कपय्॥ शषस
र्॥ हल्॥ १४॥ इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि॥ एषामंत्या इतः॥ लण्सू
त्रेऽकारश्च॥ हकारादिष्वकार उच्चारणार्थः॥ हलंत्यं॥ हलिति सूत्रेंत्यमित्स्या
त्॥ आदिरंत्येन सहेता॥ अंत्येनेतासहित आदिर्मध्यगानां स्वस्य च सं
ज्ञास्यात्॥ इति हल्संज्ञायां॥ हलंत्यं॥ उपदेशेंत्यं हलित्स्यात्॥ उपदेश आ
द्योच्चारणं॥ ततोण् अच् इति संज्ञासिद्धौ॥ उपदेशेजनुनासिक इत्॥ उ
पदेशेनुनासिकोज् इत्संज्ञः स्यात्॥ प्रतिज्ञानुनासिक्याः पाणिनीयाः॥ ल
ण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥ प्रत्याहारेष्वितां न

१

ग्रहणं। अनुनासिक इति निर्देशात्। नह्यत्र ककारे परे ज्त्व कार्यं दृश्यते। आदिरं
त्येन सहेतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियंते॥ ऊकालोऽज्झ्रस्व
दीर्घप्लुतः॥ उश्च ऊश्च ऊ३श्च वः। वां कालो यस्य सोऽच् क्रमात् ह्रस्वदी
र्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा॥ उच्चैरुदात्तः॥ ताल्वा
दिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्। आ ये त्वं वीतु॥ नी
चैरनुदात्तः॥ स्पष्टं। अर्वाङ्॥ समाहारः स्वरितः॥ उदात्तानुदात्तत्ववर्णधर्मौ
समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्॥ तस्यादित उदात्तमर्धह्रस्वं॥
ह्रस्वग्रहणमतंत्रं। स्वरितस्यादितोऽर्धमुदात्तं। उत्तरार्धं तु परिशेषादनु
दात्तं। तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टं। अन्यत्र तु दात्तश्रुतिः। प्रातिशा
ख्येषु प्रसिद्धा। क१ वोऽश्वाः। रथानां न ये ३राः। शतचक्रं यो ३ह्यः इत्यादिषु।

36

दात्तश्रुतिः। अग्निमीळे इत्यादौ उदात्तश्रुतिः॥ स नवविधोपि प्रत्येकमनुनासिका
नुनासिकाजित्संत्वाभ्यां द्विधा॥ मुखनासिकावचनोनुनासिकः॥ मुखसहि
तनासिकया उच्चार्यमाणो वर्णोनुनासिकसंज्ञः स्यात्। तदित्थं अ इ उ ऋ एषां वे
र्णानां प्रत्येकमष्टादशभेदाः। लृवर्णस्य द्वादश। तस्य दीर्घाभावात्। एचामपि
द्वादश। तेषां ह्रस्वाभावात्॥ तुल्यास्यप्रयत्नं सवर्णं। ताल्वादिस्थानमाभ्यं
तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। अकु
हविसर्जनीयानां कंठः। इचुयशानां तालु। ऋटुरषाणां मूर्द्धा। लृतुलसानां
दंताः। उपूपध्मानीयानामोष्ठौ। अमङणनानां नासिका च। एदैतोः कं
ठतालु। ओदौतोः कंठोष्ठं। वकारस्य दंतोष्ठं। जिह्वामूलीयस्य जिह्वामू
लं। नासिकानुस्वारस्य। इति स्थानानि। प्रयत्नो द्विधा आभ्यंतरो बाह्यश्च।

२

॥अथब्रह्मयज्ञसमारंभः॥ अद्येत्यादिपुण्यतिथौ॥ ममोपात्तदुरितक्षय
द्वाराश्रीपरमेश्वरप्रीत्यर्थं ऋग्वेदादिसकलवेदांतरगतदेवतातुष्ट्य
र्थं ब्रह्मयज्ञपूर्वकं देवऋषिपितृतर्पणं चयक्ष्ये इति संकल्प्य॥ विद्यु
दसिविद्यमेपाप्मानमृतात्सत्यमुपैमिति जलंस्पृष्ट्वा॥ प्रणवस्यपरब्रह्म
ऋषिः परमात्मादेवता

38

अ०
१

॥श्रीगणेशायनमः श्रीमार्तंडभैरवायनमः हरिःॐ अइउण्।ऋऌक्।
एओङ्।ऐऔच्।हयवरट्।लण्।ञमङणनम्।झभञ्।घढधष्।जबग
डदश्।खफछठथचटतव्।कपय्।शषसर्।हल्॥इतिप्रत्याहारसूत्राणि।
वृद्धिरादैच्।अदेङ्गुणः।इकोगुणवृद्धी।नधातुलोपआर्द्धधातुके।क्ङि
तिच।दीधीवेवीटां।हलोनंतराःसंयोगः।मुखनासिकावचनोनुनासि
कः।तुल्यास्यप्रयत्नंसवर्णं।नाज्झलौ।ईदूतौ।ईदूदेद्द्विवचनंप्रगृह्यं।अ
दसोमात्।शे।निपातएकाजनाङ्।ओत्।संबुद्धौशाकल्यस्येतावनार्षे।
उञः।ऊँ।ईदूतौचसप्तम्यर्थे।दाधाध्वदाप्॥१॥आद्यंतवदेकस्मिन्।तरतम

१

योघः। बहुगणवतुडतिसंख्या। ष्णांता षट्। इति च। क्तक्तवतू निष्ठा। सर्वा
दीनि सर्वनामानि। विभाषा दिक्समासे बहुव्रीहौ। न बहुव्रीहौ। तृती
यासमासे। द्वंद्वे च। विभाषा जसि। प्रथमचरमतयाल्पार्धकतिपयने
मश्च। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां।
स्वमज्ञातिधनाख्यायां। अंतरं बहिर्योगोपसंव्यानयोः। स्वरादि
निपातमव्ययं। तद्धितश्चासर्वविभक्तिः। कृन्मेजंतः। क्त्वातोसुन्क
सुनः॥ २॥ अव्ययीभावश्च। शि सर्वनामस्थानं। सुडनपुंसकस्य।
न वेति विभाषा। इग्यणः संप्रसारणं। आद्यंतौ टकितौ। मि

अ०
१

इचोंत्यात्परः। एच इग्घ्रस्वादेशे। षष्ठीस्थानेयोगा। स्थानेंतरतमः। उर
ण्परः। अलोंत्यस्य। ङिच्च। आदेः परस्य। अनेकाल्शित्सर्वस्य। स्था
निवदादेशोनल्विधौ। अचः परस्मिन्पूर्वविधौ। नपदांतद्विर्व
चनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। द्विर्वचनेचि।
अदर्शनंलोपः। ३। प्रत्ययस्यलुक्श्लुलुपः। प्रत्ययलोपेप्रत्यय
लक्षणं। नलुमतांगस्य। अचोंत्यादिटि। अलोंत्यात्पूर्वउपधा। त
स्मिन्नितिनिर्दिष्टेपूर्वस्य। तस्मादित्युत्तरस्य। स्वंरूपंशब्दस्याशब्द
स्याशब्दसंज्ञा। अणुदित्सवर्णस्यचाप्रत्ययः। तपरस्तत्कालस्य।

२

आद्यश्चतुर्धा। स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानां। ईष
त्स्पृष्टमंतस्थानां। विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतं।
प्रक्रियादशायां तु विवृतमेव। एतच्च सूत्रकारेण ज्ञापितं। तथाहि। अ अ इ
ति। विवृतमनूद्य संवृतोनेन विधीयते। अस्य चाष्टाध्यायीं संपूर्णां प्रति असि
द्धत्वाच्छास्त्रदृष्ट्या विवृतमेवास्त्येव। तथा च सूत्रं। पूर्वत्रासिद्धं। अधिका
रोयं तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रति
परं शास्त्रमसिद्धं। बाह्यप्रयत्नस्त्वेकादशधा। विवारः संवारः श्वासो ना
दो घोषोल्पप्राणो महाप्राण उदात्तोनुदात्तः स्वरितश्चेति। खखयां य
मः खयः ᳵक ᳶपौ विसर्गः शर एव च। एते श्वासानुप्रदाना अघोषाश्च विवृ

पद्यते।१। कंठमन्येतु घोषास्तु: संवृतानादभागिनः॥ अयुग्मा वर्गयमगा यणश्चा
ल्पासवः स्मृताः॥२॥ वर्गेष्वाद्यानां चतुर्णां पंचमे परे मध्ये यमो नाम पूर्वसदृशो
वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्नी। चख्नतुः। अग्निः। घ्नंती। अत्र क्रमेण कखग
घेभ्यः परे तत्सदृशा एव यमाः॥ तत्र वर्गाणां प्रथमद्वितीयः खयः। तथा तेषां च
यमाः। जिह्वामूलीयोपध्मानीयो विसर्गः शषसाश्चेति एषां विवारः श्वासो घो
षश्च। अन्येषां तु संविवारो नादो घोषश्च। वर्गाणां प्रथमतृतीयपंचमाः प्रथमतृती
ययमौ यरलवाल्पप्राणाः॥ अन्ये महाप्राणा इत्यर्थः। बाह्यप्रयत्नाश्च यद्यपि
सवर्णसंज्ञायामनुपयुक्तत्वात्तथापि आंतरतम्यपरीक्षायामुपयोक्ष्यंत इति
बोध्यं। कादयो मावसानाः स्पर्शाः। यरलवा अंतस्थाः। शषसहा ऊष्माणः। अचः
स्वराः। कपाविति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ।
अं अः इत्यचः परावनुस्वारविसर्गौ॥ इति प्रयत्नविवेकः॥ ऋल्वर्णयोर्मिथः ३

सावर्ण्यं वाच्यं।अकारहकारयोरिकारशकारयोः ऋकारषकारयोः ऌकारसा
कारयोश्च सावर्ण्ये प्राप्ते॥ नाज्झलौ॥ आकारसहितोऽच् आच् स च हल् च तेस्यैतौ मि
